শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে অষ্টাদশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে অষ্টাদশং দশকম্॥

## পৃথুচরিতৱর্ণনম্

জাতস্য ধ্রুৱকুল এৱ তুঙ্গকীর্তে -
    রঙ্গস্য ৱ্যজনি সুতঃ স ৱেননামা।
যদ্দোষৱ্যথিতমতিঃ স রাজৱর্য -
    স্ত্বৎপাদে নিহিতমনা ৱনং গতোঽভূৎ॥ **18.1** ॥

পাপোঽপি ক্ষিতিতলপালনায ৱেনঃ
    পৌরাদ্যৈরুপনিহিতঃ কঠোরৱীর্যঃ।
সর্ৱেভ্যো নিজবলমেৱ সম্প্রশংসন্
    ভূচক্রে তৱ যজনান্যযং ন্যরৌৎসীৎ॥ **18.2** ॥

সম্প্রাপ্তে হিতকথনায তাপসৌঘে
    মত্তোঽন্যো ভুৱনপতির্ন কশ্চনেতি।
ৎৱন্নিন্দাৱচনপরো মুনীশ্ৱরৈস্তৈঃ
    শাপাগ্নৌ শলভদশামনাযি ৱেনঃ॥ **18.3** ॥

তন্নাশাৎ খলজনভীরুকৈর্মুনীন্দ্রৈ -
    স্তন্মাত্রা চিরপরিরক্ষিতে তদঙ্গে।
ত্যক্তাঘে পরিমথিতাদথোরুদণ্ডাৎ
    দোর্দণ্ডে পরিমথিতে ৎৱমাৱিরাসীঃ॥ **18.4** ॥

ৱিখ্যাতঃ পৃথুরিতি তাপসোপদিষ্টৈঃ
    সূতাদ্যৈঃ পরিণুতভাৱিভূরিৱীর্যঃ।

ৱেনার্ত্যা কবলিতসম্পদং ধরিত্রী -
মাক্রান্তাং নিজধনুষা সমামকার্ষীঃ॥ **18.5**॥

ভূযস্তাং নিজকুলমুখ্যৱৎসযুক্তৈ -
র্দেৱাদ্যৈঃ সমুচিতচারুভাজনেষু।
অন্নাদীন্যভিলষিতানি যানি তানি
স্বচ্ছন্দং সুরভিতনূমদূদুহস্ত্বম্॥ **18.6**॥

আত্মানং যজতি মখৈস্ত্বযি ত্রিধাম -
ন্নারব্ধে শততমৱাজিমেধযাগে।
স্পর্ধালুঃ শতমখ এত্য নীচৱেষো
হৃৎৱাহশ্ৱং তৱ তনযাৎ পরাজিতোঽভূৎ॥ **18.7**॥

দেৱেন্দ্রং মুহুরিতি ৱাজিনং হরন্তং
ৱহ্নৌ তং মুনিৱরমণ্ডলে জুহূষৌ।
রুন্ধানে কমলভৱে ক্রতোস্সমাপ্তৌ
সাক্ষাৎ ৎৱং মধুরিপুমৈক্ষথাঃ স্ৱযং স্ৱম্॥ **18.8**॥

তদ্দত্তং ৱরমুপলভ্য ভক্তিমেকাং
গঙ্গান্তে ৱিহিতপদঃ কদাপি দেৱ।
সত্রস্থং মুনিনিৱহং হিতানি শংস -
ন্নৈক্ষিষ্ঠাঃ সনকমুখান্ মুনীন্ পুরস্তাৎ॥ **18.9**॥

ৱিজ্ঞানং সনকমুখোদিতং দধানঃ
স্বাত্মানং স্বযমগমো ৱনান্তসেৱী।
তত্তাদৃকপৃথুৱপুরীশ সৎৱরং মে
রোগৌঘং প্রশময ৱাতগেহৱাসিন্॥ **18.10**॥

॥ ইতি শ্রীমন্নারাযণীযে অষ্টাদশং দশকং সমাপ্তম্॥